# shrI naTesha sahasranAmastotram

# શ્રીનટેશસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : naTeshasahasranAmastotram

File name : naTeshasahasranAmastotra.itx

Category : sahasranAma, shiva

Location : doc_shiva

Proofread by : DPD

Latest update : July 19, 2015

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# શ્રીનટેશસહસ્રનામસ્તોત્રમ્

પૂર્વપીઠિકા
યસ્માત્સર્વં સમુત્પન્નં ચરાચરમિદં જગત્ ।
ઇદં નમો નટેશાય તસ્મૈ કારુણ્યમૂર્તયે ॥

ૐ કૈલાસશિખરે રમ્યે રત્નસિંહાસને સ્થિતમ્ ।
શઙ્કરં કરુણામૂર્તિં પ્રણમ્ય પરયા મુદા ॥ ૧॥

વિનયાવનતા ભૂત્વા પપ્રચ્છ પરમેશ્વરી ।
ભગવન્ ભવ સર્વજ્ઞ ભવતાપહરાવ્યય ॥ ૨॥

ત્વત્તઃ શ્રુતં મયા દેવ સર્વં નામસહસ્રકમ્ ।
નટેશસ્ય તુ નામાનિ ન શ્રુતાનિ મયા પ્રભો ॥ ૩॥

અસંકૃત્પ્રાર્થિતોઽપિ ત્વં ન તત્કથિતવાનસિ ।
ઇદાનીં કૃપયા શમ્ભો વદ વાઞ્છાભિપૂર્તયે ॥ ૪॥

શ્રી શિવ ઉવાચ
સાધુ સાધુ મહાદેવિ પૃષ્ટં સર્વજગદ્ધિતમ્ ।
પુરા નારાયણઃ શ્રીમાન્ લોકરક્ષાપરાયણઃ ॥ ૫॥

ક્ષીરાબ્ધૌ સુચિરં કાલં સામ્બમૂર્તિધરં શિવમ્ ।
મામેકાગ્રેણ ચિત્તેન ધ્યાયન્ ન્યવસદચ્યુતઃ ॥ ૬॥

તપસા તસ્ય સન્તુષ્ટઃ પ્રસન્નોઽહં કૃપાવશાત્ ।
ધ્યાનાત્સમુત્થિતો વિષ્ણુર્લક્ષ્મ્યા માં પર્યપૂજયત્ ॥ ૭॥

તુષ્ટાવ વિવિધૈસ્સ્તોત્રૈર્વેદવેદાન્તસમ્મિતૈઃ ।
વરં વરય હે વત્સ યદિષ્ટં મનસિ સ્થિતમ્ ॥ ૮॥

તત્તે દાસ્યામિ ન ચિરાદિત્યુક્તઃ કમલેક્ષણઃ ।
પ્રાહ માં પરયા ભક્ત્યા વરં દાસ્યસિ ચેત્પ્રભો ॥ ૯॥

રક્ષાર્થં સર્વજગતામસુરાણાં ક્ષયાય ચ ।
સાર્વાત્મ્યયોગસિદ્ધ્યર્થં મન્ત્રમેકં મમાદિશ ॥ ૧૦॥

ઇતિ સમ્પ્રાર્થિતસ્તેન માધવેનાહમમ્બિકે ।
સઞ્ચિન્ત્યાનુત્તમં સ્તોત્રં સર્વેષાં સર્વસિદ્ધિદમ્ ॥ ૧૧॥

નટેશનામસાહસ્રમુક્તવાનસ્મિ વિષ્ણવે ।
તેન જિત્વાઽસુરાન્ સર્વાન્ રરક્ષ સકલં જગત્ ॥ ૧૨॥

સાર્વાત્મ્યયોગસિદ્ધિં ચ પ્રાપ્તવાનમ્બુજેક્ષણઃ ।
તદેવ પ્રાર્થયસ્યદ્ય નામસાહસ્રમમ્બિકે ॥ ૧૩॥

પઠનાન્મનનાત્તસ્ય નૃત્તં દર્શયતિ પ્રભુઃ ।
સર્વપાપહરં પુણ્યં સર્વરક્ષાકરં નૃણામ્ ॥ ૧૪॥

સર્વૈશ્વર્યપ્રદં સર્વસિદ્ધિદં મુક્તિદં પરમ્ ।
વક્ષ્યામિ શૃણુ હે દેવિ નામસાહસ્રમુત્તમમ્ ॥ ૧૫॥

અથ શ્રીનટેશસહસ્રનામસ્તોત્રમ્ ।

ૐ અસ્ય શ્રીનટેશસહસ્રનામસ્તોત્રમાલામહામન્ત્રસ્ય
સદાશિવ ઋષિઃ, મહાવિરાટ્ છન્દઃ શ્રીમન્નટેશો દેવતા ।
બીજં, શક્તિઃ, કીલકં, અઙ્ગન્યાસકરન્યાસૌ ચ ચિન્તામણિમન્ત્રવત્ ।

ધ્યાનમ્
ધ્યાયેત્કોટિરવિપ્રભં ત્રિનયનં શીતાંશુગઙ્ગાધરં
દક્ષાઙ્ઘ્રિસ્થિતવામકુઞ્ચિતપદં શાર્દૂલચર્મામ્બરમ્ ।
વહ્નિં ડોલકરાભયં ડમરુકં વામે શિવાં (સ્થિતાં) શ્યામલાં
કલ્હારં જપસૃક્ષુકં (દધતીં પ્રલમ્બિતકરા) કટિકરાં
દેવીં સભેશં ભજે ॥

લં પૃથિવ્યાત્મકમ્ ઇત્યાદિના પઞ્ચપૂજા ।

શ્રીશિવ ઉવાચ
શ્રીશિવઃ શ્રીશિવાનાથઃ શ્રીમાન્ શ્રીપતિપૂજિતઃ ।
શિવઙ્કરઃ શિવતરશ્શિષ્ટહૃષ્ટશ્શિવાગમઃ ॥ ૧॥

અખણ્ડાનન્દચિદ્રૂપઃ પરમાનન્દતાણ્ડવઃ ।
અપસ્મૃતિન્યસ્તપાદઃ કૃત્તિવાસાઃ કૃપાકરઃ ॥ ૨॥

કાલીવાદપ્રિયઃ કાલઃ કાલાતીતઃ કલાધરઃ ।
કાલનેતા કાલહન્તા કાલચક્રપ્રવર્તકઃ ॥ ૩॥

કાલજ્ઞઃ કામદઃ કાન્તઃ કામારિઃ કામપાલકઃ ।
કલ્યાણમૂર્તિઃ કલ્યાણીરમણઃ કમલેક્ષણઃ ॥ ૪॥

કાલકણ્ઠઃ કાલકાલઃ કાલકૂટવિષાશનઃ ।
કૃતજ્ઞઃ કૃતિસારજ્ઞઃ કૃશાનુઃ કૃષ્ણપિઙ્ગલઃ ॥ ૫॥

કરિચર્મામ્બરધરઃ કપાલી કલુષાપહઃ ।
કપાલમાલાભરણઃ કઙ્કાલઃ કલિનાશનઃ ॥ ૬॥

કૈલાસવાસી કામેશઃ કવિઃ કપટવર્જિતઃ ।
કમનીયઃ કલાનાથશેખરઃ કમ્બુકન્ધરઃ ॥ ૭॥

કન્દર્પકોટિસદૃશઃ કપર્દી કમલાનનઃ ।
કરાબ્જધૃતકાલાગ્નિઃ કદમ્બકુસુમારુણઃ ॥ ૮॥

કમનીયનિજાનન્દમુદ્રાઞ્ચિતકરામ્બુજઃ ।
સ્ફુરડ્ડમરુનિધ્વાનનિર્જિતામ્ભોધિનિસ્વનઃ ॥ ૯॥

ઉદ્દણ્ડતાણ્ડવશ્ચણ્ડ ઊર્ધ્વતાણ્ડવપણ્ડિતઃ ।
સવ્યતાણ્ડવસમ્પન્નો મહાતાણ્ડવવૈભવઃ ॥ ૧૦॥

બ્રહ્માણ્ડકાણ્ડવિસ્ફોટમહાપ્રલયતાણ્ડવઃ ।
મહોગ્રતાણ્ડવાભિજ્ઞઃ પરિભ્રમણતાણ્ડવઃ ॥ ૧૧॥

નન્દિનાટ્યપ્રિયો નન્દી નટેશો નટવેષભૃત્ ।
કાલિકાનાટ્યરસિકો નિશાનટનનિશ્ચલઃ ॥ ૧૨॥

ભૃઙ્ગિનાટ્યપ્રમાણજ્ઞો ભ્રમરાયિતનાટ્યકૃત્ ।
વિયદાદિજગત્સ્રષ્ટા વિવિધાનન્દદાયકઃ ॥ ૧૩॥

વિકારરહિતો વિષ્ણુર્વિરાડીશો વિરાણ્મયઃ ।
વિરાડ્ઢૃદયપદ્મસ્થો વિધિર્વિશ્વાધિકો વિભુઃ ॥ ૧૪॥

વીરભદ્રો વિશાલાક્ષો વિષ્ણુબાણો વિશામ્પતિઃ ।
વિદ્યાનિધિર્વિરૂપાક્ષો વિશ્વયોનિર્વૃષધ્વજઃ ॥ ૧૫॥

વિરૂપો વિશ્વદિગ્વ્યાપી વીતશોકો વિરોચનઃ ।
વ્યોમકેશો વ્યોમમૂર્તિર્વ્યોમાકારોઽવ્યયાકૃતિઃ ॥ ૧૬॥

વ્યાઘ્રપાદપ્રિયો વ્યાઘ્રચર્મધૃદ્વ્યાધિનાશનઃ ।
વ્યાકૃતો વ્યાપૃતો વ્યાપી વ્યાપ્યસાક્ષી વિશારદઃ ॥ ૧૭॥

વ્યામોહનાશનો વ્યાસો વ્યાખ્યામુદ્રાલસત્કરઃ ।
વરદો વામનો વન્દ્યો વરિષ્ઠો વજ્રવર્મભૃત્ ॥ ૧૮॥

વેદવેદ્યો વેદરૂપો વેદવેદાન્તવિત્તમઃ ।
વેદાર્થવિદ્વેદયોનિઃ વેદાઙ્ગો વેદસંસ્તુતઃ ॥ ૧૯॥

વૈકુણ્ઠવલ્લભોઽવર્ષ્યો વૈશ્વાનરવિલોચનઃ ।
સમસ્તભુવનવ્યાપી સમૃદ્ધસ્સતતોદિતઃ ॥ ૨૦॥

સૂક્ષ્માત્સૂક્ષ્મતરઃ સૂર્યઃ સૂક્ષ્મસ્થૂલત્વવર્જિતઃ ।
જહ્નુકન્યાધરો જન્મજરામૃત્યુનિવારકઃ ॥ ૨૧॥

શૂરસેનઃ શુભાકારઃ શુભ્રમૂર્તિઃ શુચિસ્મિતઃ ।
અનર્ઘરત્નખચિતકિરીટો નિકટે સ્થિતઃ ॥ ૨૨॥

સુધારૂપઃ સુરાધ્યક્ષઃ સુભ્રૂઃ સુખઘનઃ સુધીઃ ।
ભદ્રો ભદ્રપ્રદો ભદ્રવાહનો ભક્તવત્સલઃ ॥ ૨૩॥

ભગનેત્રહરો ભર્ગો ભવઘ્નો ભક્તિમન્નિધિઃ ।
અરુણઃ શરણઃ શર્વઃ શરણ્યઃ શર્મદઃ શિવઃ ॥ ૨૪॥

પવિત્રઃ પરમોદારઃ પરમાપન્નિવારકઃ ।
સનાતનસ્સમઃ સત્યઃ સત્યવાદી સમૃદ્ધિદઃ ॥ ૨૫॥

ધન્વી ધનાધિપો ધન્યો ધર્મગોપ્તા ધરાધિપઃ ।
તરુણસ્તારકસ્તામ્રસ્તરિષ્ણુસ્તત્ત્વબોધકઃ ॥ ૨૬॥

રાજરાજેશ્વરો રમ્યો રાત્રિઞ્ચરવિનાશનઃ ।
ગહ્વરેષ્ઠો ગણાધીશો ગણેશો ગતિવર્જિતઃ ॥ ૨૭॥

પતઞ્જલિપ્રાણનાથઃ પરાપરવિવર્જિતઃ ।
પરમાત્મા પરજ્યોતિઃ પરમેષ્ઠી પરાત્પરઃ ॥ ૨૮॥

નારસિંહો નગાધ્યક્ષો નાદાન્તો નાદવર્જિતઃ ।
નમદાનન્દદો નમ્યો નગરાજનિકેતનઃ ॥ ૨૯॥

દૈવ્યો ભિષક્પ્રમાણજ્ઞો બ્રહ્મણ્યો બ્રાહ્મણાત્મકઃ ।

કૃતાકૃતઃ કૃશઃ કૃષ્ણઃ શાન્તિદશ્શરભાકૃતિઃ ॥ ૩૦॥

બ્રહ્મવિદ્યાપ્રદો બ્રહ્મા બૃહદ્ગર્ભો બૃહસ્પતિઃ ।
સદ્યો જાતસ્સદારાધ્યઃ સામગસ્સામસંસ્તુતઃ ॥ ૩૧॥

અઘોરોઽદ્ભુતચારિત્ર આનન્દવપુરગ્રણીઃ ।
સર્વવિદ્યાનામીશાન ઈશ્વરાણામધીશ્વરઃ ॥ ૩૨॥

સર્વાર્થઃ સર્વદા તુષ્ટઃ સર્વશાસ્ત્રાર્થસમ્મતઃ ।
સર્વજ્ઞઃ સર્વદઃ સ્થાણુઃ સર્વેશસ્સમરપ્રિયઃ ॥ ૩૩॥

જનાર્દનો જગત્સ્વામી જન્મકર્મનિવારકઃ ।
મોચકો મોહવિચ્છેત્તા મોદનીયો મહાપ્રભુઃ ॥ ૩૪॥

વ્યુપ્તકેશો વિવિશદો વિષ્વક્સેનો વિશોધકઃ ।
સહસ્રાક્ષઃ સહસ્રાઙ્ઘ્રિઃ સહસ્રવદનામ્બુજઃ ॥ ૩૫॥

સહસ્રાક્ષાર્ચિતઃ સમ્રાટ્ સન્ધાતા સમ્પદાલયઃ ।
બભ્રુર્બહુવિધાકારો બલપ્રમથનો બલી ॥ ૩૬॥

મનોભર્તા મનોગમ્યો મનનૈકપરાયણઃ ।
ઉદાસીન ઉપદ્રષ્ટા મૌનગમ્યો મુનીશ્વરઃ ॥ ૩૭॥

અમાની મદનોઽમન્યુરમાનો માનદો મનુઃ ।
યશસ્વી યજમાનાત્મા યજ્ઞભુગ્યજનપ્રિયઃ ॥ ૩૮॥

મીઢુષ્ટમો મૃગધરો મૃકણ્ડુતનયપ્રિયઃ ।
પુરુહૂતઃ પુરદ્વેષી પુરત્રયવિહારવાન્ ॥ ૩૯॥

પુણ્યઃ પુમાન્પુરિશયઃ પૂષા પૂર્ણઃ પુરાતનઃ ।
શયનશ્શન્તમઃ શાન્ત શાસકશ્શ્યામલાપ્રિયઃ ॥ ૪૦॥

ભાવજ્ઞો બન્ધવિચ્છેત્તા ભાવાતીતોઽભયઙ્કરઃ ।
મનીષી મનુજાધીશો મિથ્યાપ્રત્યયનાશનઃ ॥ ૪૧॥

નિરઞ્જનો નિત્યશુદ્ધો નિત્યબુદ્ધો નિરાશ્રયઃ ।
નિર્વિકલ્પો નિરાલમ્બો નિર્વિકારો નિરામયઃ ॥ ૪૨॥

નિરઙ્કુશો નિરાધારો નિરપાયો નિરત્યયઃ ।
ગુહાશયો ગુણાતીતો ગુરુમૂર્તિર્ગુહપ્રિયઃ ॥ ૪૩॥

પ્રમાણં પ્રણવઃ પ્રાજ્ઞઃ પ્રાણદઃ પ્રાણનાયકઃ ।
સૂત્રાત્મા સુલભસ્સ્વચ્છઃ સૂદરસ્સુન્દરાનનઃ ॥ ૪૪॥

કપાલમાલાલઙ્કારઃ કાલાન્તકવપુર્ધરઃ ।
દુરારાધ્યો દુરાધર્ષો દુષ્ટદૂરો દુરાસદઃ ॥ ૪૫॥

દુર્વિજ્ઞેયો દુરાચારનાશનો દુર્મદાન્તકઃ ।
સર્વેશ્વરઃ સર્વસાક્ષી સર્વાત્મા સાક્ષિવર્જિતઃ ॥ ૪૬॥

સર્વદ્વન્દ્વક્ષયકરઃ સર્વાપદ્વિનિવારકઃ ।
સર્વપ્રિયતમસ્સર્વદારિદ્યક્લેશનાશનઃ ॥ ૪૭॥

દ્રષ્ટા દર્શયિતા દાન્તો દક્ષિણામૂર્તિરૂપભૃત્ ।
દક્ષાધ્વરહરો દક્ષો દહરસ્થો દયાનિધિઃ ॥ ૪૮॥

સમદૃષ્ટિસ્સત્યકામઃ સનકાદિમુનિસ્તુતઃ ।
પતિઃ પઞ્ચત્વનિર્મુક્તઃ પઞ્ચકૃત્યપરાયણઃ ॥

પઞ્ચયજ્ઞપ્રિયઃ પઞ્ચપ્રાણાધિપતિરવ્યયઃ ।
પઞ્ચભૂતપ્રભુઃ પઞ્ચપૂજાસન્તુષ્ટમાનસઃ ॥ ૫૦॥

વિઘ્નેશ્વરો વિઘ્નહન્તા શક્તિપાણિશ્શરોદ્ભવઃ ।
ગૂઢો ગુહ્યતમો ગોપ્યો ગોરક્ષી ગણસેવિતઃ ॥ ૫૧॥

સુવ્રતસ્સત્યસઙ્કલ્પઃ સ્વસંવેદ્યસ્સુખાવહઃ ।
યોગગમ્યો યોગનિષ્ઠો યોગાનન્દો યુધિષ્ઠિરઃ ॥ ૫૨॥

તત્ત્વાવબોધસ્તત્વેશઃ તત્ત્વભાવસ્તપોનિધિઃ ।
અક્ષરસ્ત્ર્યક્ષરસ્ત્રયક્ષઃ પક્ષપાતવિવર્જિતઃ ॥ ૫૩॥

માણિભદ્રાર્ચિતો માન્યો માયાવી માન્ત્રિકો મહાન્ ।
કુઠારભૃત્કુલાદ્રીશઃ કુઞ્ચિતૈકપદામ્બુજઃ ॥ ૫૪॥

યક્ષરાડ્યજ્ઞફલદો યજ્ઞમૂર્તિર્યશસ્કરઃ ।
સિદ્ધેશસ્સિદ્ધિજનકઃ સિદ્ધાન્તસ્સિદ્ધવૈભવઃ ॥ ૫૫॥

રવિમણ્ડલમધ્યસ્થો રજોગુણવિવર્જિતઃ ।
વહ્નિમણ્ડલમધ્યસ્થો વર્ષીયાન્ વરુણેશ્વરઃ ॥ ૫૬॥

સોમમણ્ડલમધ્યસ્થઃ સોમસ્સૌમ્યસ્સુહૃદ્વરઃ ।
દક્ષિણાગ્નિર્ગાર્હપત્યો દમનો દમનાન્તકઃ (દાનવાન્તકઃ) ॥ ૫૭॥

ચતુર્વક્ત્રશ્ચક્રધરઃ પઞ્ચવક્ત્રઃ પરં તપઃ ।
વિશ્વસ્યાયતનો વર્યો વન્દારુજનવત્સલઃ ॥ ૫૮॥

ગાયત્રીવલ્લભો ગાર્ગ્યો ગાયકાનુગ્રહોન્મુખઃ ।
અનન્તરૂપ એકાત્મા સ્વસ્તરુર્વ્યાહૃતિસ્સ્વધા ॥ ૫૯॥

સ્વાહારૂપો વસુમનાઃ વટુકઃ ક્ષેત્રપાલકઃ ।
શ્રાવ્યશ્શત્રુહરશ્શૂલી શ્રુતિસ્મૃતિવિધાયકઃ ॥ ૬૦॥

અપ્રમેયોઽપ્રતિરથઃ પ્રદ્યુમ્નઃ પ્રમથેશ્વરઃ ।
અનુત્તમો હ્યુદાસીનો મુક્તિદો મુદિતાનનઃ ॥ ૬૧॥

ઊર્ધ્વરેતા ઊર્ધ્વપાદઃ પ્રૌઢનર્તનલમ્પટઃ ।
મહામાયો મહાયાસો મહાવીર્યો મહાભુજઃ ॥ ૬૨॥

મહાનન્દો મહાસ્કન્દો મહેન્દ્રો મહસાન્નિધિઃ ।
ભ્રાજિષ્ણુર્ભાવનાગમ્યઃ ભ્રાન્તિજ્ઞાનવિનાશનઃ ॥ ૬૩॥

મહર્ધિર્મહિમાધારો મહાસેનગુરુર્મહઃ ।
સર્વદૃગ્સર્વભૂત્સર્ગઃ સર્વહૃત્કોશસંસ્થિતઃ ॥ ૬૪॥

દીર્ઘપિઙ્ગજટાજૂટો દીર્ઘબાહુર્દિગમ્બરઃ ।
સંયદ્વામસ્સઞ્યમીન્દ્રઃ સંશયચ્છિત્સહસ્રદૃક્ ॥ ૬૫॥

હેતુદૃષ્ટાન્તનિર્મુક્તો હેતુર્હેરમ્બજન્મભૂઃ ।
હેલાવિનિર્મિતજગદ્ધેમશ્મશ્રુર્હિરણ્મયઃ ॥ ૬૬॥

સકૃદ્વિભાતસ્સંવેત્તા સદસત્કો ટિવર્જિતઃ ।
સ્વાત્મસ્થસ્સ્વાયુધઃ સ્વામી સ્વાનન્યસ્સ્વાંશિતાખિલઃ ॥ ૬૭॥

રાતિર્દાતિશ્ચતુષ્પાદઃ સ્વાત્મરુણહરસ્સ્વભૂઃ ।
વશી વરેણ્યો વિતતો વજ્રભૃદ્વરુણાત્મજઃ ॥ ૬૮॥

ચૈતન્યશ્ચિચ્છિદદ્વૈતઃ ચિન્માત્રશ્ચિત્સભાધિપઃ ।
ભૂમા ભૂતપતિર્ભવ્યો ભૂર્ભુવો વ્યાહૃતિપ્રિયઃ ॥ ૬૯॥

વાચ્યવાચકનિર્મુક્તો વાગીશો વાગગોચરઃ ।
વેદાન્તકૃત્તુર્યપાદો વૈદ્યુતસ્સુકૃતોદ્ભવઃ ॥ ૭૦॥

અશુભક્ષયકૃજ્જ્યોતિઃ અનાકાશો હ્યલેપકઃ ।

આપ્તકામોઽનુમન્તાઽઽત્મ કામોઽભિન્નોઽનણુર્હરઃ ॥ ૭૧॥

અસ્નેહસ્સઙ્ગનિર્મુક્તોઽહ્રસ્વોઽદીર્ઘોઽવિશેષકઃ ।
સ્વચ્છન્દસ્સ્વચ્છસંવિત્તિરન્વેષ્ટવ્યોઽશ્રુતોઽમૃતઃ ॥ ૭૨॥

અપરોક્ષોઽવ્રણોઽલિઙ્ગોઽવિદ્વેષ્ટા પ્રેમસાગરઃ ।
જ્ઞાનલિઙ્ગો ગતિર્જ્ઞાની જ્ઞાનગમ્યોઽવભાસકઃ ॥ ૭૩॥

શુદ્ધસ્ફટિકસઙ્કાશઃ શ્રુતિપ્રસ્તુતવૈભવઃ ।
હિરણ્યબાહુસ્સેનાની હરિકેશો દિશાં પતિઃ ॥ ૭૪॥

સસ્પિઞ્જરઃ પશુપતિઃ ત્વિષીમાનધ્વનાં પતિઃ ।
બભ્લુશો ભગવાન્ભવ્યો વિવ્યાધી વિગતજ્વરઃ ॥ ૭૫॥

અન્નાનાં પતિરત્યુગ્રો હરિકેશોઽદ્વયાકૃતિઃ ।
પુષ્ટાનાં પતિરવ્યગ્રો ભવહેતુર્જગત્પતિઃ ॥ ૭૬॥

આતતાવી મહારુદ્રઃ ક્ષેત્રાણામધિપોઽક્ષયઃ ।
સૂતસ્સદસ્પતિસ્સૂરિરહન્ત્યો વનપો વરઃ ॥ ૭૭॥

રોહિતસ્સ્થપતિર્વૃક્ષપતિર્મન્ત્રી ચ વાણિજઃ ।
કક્ષપશ્ચ ભુવન્તિશ્ચ ભવાખ્યો વારિવસ્કૃતઃ ॥ ૭૮॥

ઓષધીશસ્સતામીશઃ ઉચ્ચૈર્ઘોષો વિભીષણઃ ।
પત્તીનામધિપઃ કૃત્સ્નવીતો ધાવન્સ સત્વપઃ ॥ ૭૯॥

સહમાનસ્સત્યધર્મા નિવ્યાધી નિયમો યમઃ ।
આવ્યાધિપતિરાદિત્યઃ કકુભઃ કાલકોવિદઃ ॥ ૮૦॥

નિષઙ્ગીષુધિમાનિન્દ્રઃ તસ્કરાણામધીશ્વરઃ ।
નિચેરુકઃ પરિચરોઽરણ્યાનાં પતિરદ્ભુતઃ ॥ ૮૧॥

સૃકાવી મુષ્ણાતાં નાથઃ પઞ્ચાશદ્વર્ણરૂપભૃત્ ।
નક્તઞ્ચરઃ પ્રકૃન્તાનાં પતિર્ગિરિચરો યઃ ॥ ૮૨॥

કુલુઞ્ચાનાં પતિઃ કૂપ્યો ધન્વાવી ધનદાધિપઃ ।
આતન્વાનશ્શતાનન્દઃ ગૃત્સો ગૃત્સપતિસ્સુરઃ ॥ ૮૩॥

વ્રાતો વ્રાતપતિર્વિપ્રો વરીયાન્ ક્ષુલ્લકઃ ક્ષમી ।
બિલ્મી વરૂથી દુન્દુભ્ય આહનન્યઃ પ્રમર્શકઃ ॥ ૮૪॥

ધૃષ્ણુર્દૂતસ્તીક્ષ્ણદંષ્ટ્રઃ સુધન્વા સુલભસ્સુખી ।
સ્રુત્યઃ પથ્યઃ સ્વતન્ત્રસ્થઃ કાટ્યો નીપ્યઃ કરોટિભૃત્ ॥ ૮૫ ॥

સૂદ્યસ્સરસ્યો વૈશન્તો નાદ્યોઽવટ્યઃ પ્રવર્ષકઃ ।
વિદ્યુત્યો વિશદો મેઘ્યો રેષ્મિયો વાસ્તુપો વસુઃ ॥ ૮૬ ॥

અગ્રેવધોઽગ્રે સમ્પૂજ્યો હન્તા તારો મયોભવઃ ।
મયસ્કરો મહાતીર્થ્યઃ કૂલ્યઃ પાર્યઃ પદાત્મકઃ ॥ ૮૭ ॥

શઙ્ગઃ પ્રતરણોઽવાર્યઃ ફેન્યઃ શષ્પ્યઃ પ્રવાહજઃ ।
મુનિરાતાર્ય આલાદ્ય સિકત્યશ્ચાથ કિંશિલઃ ॥ ૮૮ ॥

પુલસ્ત્યઃ ક્ષયણો ગૃધ્યો ગોષ્ઠ્યો ગોપરિપાલકઃ ।
શુષ્ક્યો હરિત્યો લોપ્યશ્ચ સૂર્મ્યઃ પર્ણ્યોઽણિમાદિભૂઃ ॥ ૮૯ ॥

પર્ણશદ્યઃ પ્રત્યગાત્મા પ્રસન્નઃ પરમોન્નતઃ ।
શીઘ્રિયશ્શીભ્ય આનન્દ ક્ષયદ્વીરઃ ક્ષરાઽક્ષરઃ ॥ ૯૦ ॥

પાશી પાતકસંહર્તા તીક્ષ્ણેષુસ્તિમિરાપહઃ ।
વરાભયપ્રદો બ્રહ્મપુચ્છો બ્રહ્મવિદાં વરઃ ॥ ૯૧ ॥

બ્રહ્મવિદ્યાગુરુર્ગુહ્યો ગુહ્યકૈસ્સમભિષ્ટુતઃ ।
કૃતાન્તકૃત્ક્રિયાધારઃ કૃતી કૃપણરક્ષકઃ ॥ ૯૨ ॥

નૈષ્કર્મ્યદો નવરસઃ ત્રિસ્થસ્ત્રિપુરભૈરવઃ ।
ત્રિમાત્રકસ્ત્રિવૃદ્રૂપઃ તૃતીયસ્ત્રિગુણાતિગઃ ॥ ૯૩ ॥

ત્રિધામા ત્રિજગદ્ધેતુઃ ત્રિકર્તા તિર્યગૂર્ધ્વગઃ ।
પ્રપઞ્ચોપશમો નામરૂપદ્વયવિવર્જિતઃ ॥ ૯૪ ॥

પ્રકૃતીશઃ પ્રતિષ્ઠાતા પ્રભવઃ પ્રમથઃ પ્રથી ।
સુનિશ્ચિતાર્થો રાદ્ધાન્તઃ તત્ત્વમર્થસ્તપોમયઃ ।
હિતઃ પ્રમાતા પ્રાગ્વર્તી સર્વોપનિષદાશ્રયઃ ।
વિશૃઙ્ખલો વિયદ્ધેતુઃ વિષમો વિદ્રુમપ્રભઃ ॥ ૯૬ ॥

અખણ્ડબોધોઽખણ્ડાત્મા ઘણ્ટામણ્ડલમણ્ડિતઃ ।
અનન્તશક્તિરાચાર્યઃ પુષ્કલસ્સર્વપૂરણઃ ॥ ૯૭ ॥

પુરજિત્પૂર્વજઃ પુષ્પહાસઃ પુણ્યફલપ્રદઃ ।
ધ્યાનગમ્યો ધ્યાતૃરૂપો ધ્યેયો ધર્મવિદાં વરઃ ॥ ૯૮ ॥

અવશઃ સ્વવશઃ સ્થાણુરન્તર્યામી શતક્રતુઃ ।
કૂટસ્થઃ કૂર્મપીઠસ્થઃ કૂષ્માણ્ડગ્રહમોચકઃ ॥ ૯૯ ॥

કૂલઙ્કુષઃ કૃપાસિન્ધુઃ કુશલી કુઙ્કુમેશ્વરઃ ।
ગદાધરો ગણસ્વામી ગરિષ્ઠસ્તોમરાયુધઃ ॥ ૧૦૦ ॥

જવનો જગદાધારો જમદગ્નિર્જરાહરઃ ।
જટાધરોઽમૃતાધારોઽમૃતાંશુરમૃતોદ્ભવઃ ॥ ૧૦૧ ॥

વિદ્વત્તમો વિદૂરસ્થો વિશ્રમો વેદનામયઃ ।
ચતુર્ભુજશ્શતતનુઃ શમિતાખિલકૌતુકઃ ॥ ૧૦૨ ॥

વૌષટ્કારો વષટ્કારો હુઙ્કારઃ ફટ્કરઃ પટુઃ ।
બ્રહ્મિષ્ઠો બ્રહ્મસૂત્રાર્થો બ્રહ્મજ્ઞો બ્રહ્મચેતનઃ ॥ ૧૦૩ ॥

ગાયકો ગરુડારૂઢો ગજાસુરવિમર્દનઃ ।
ગર્વિતો ગગનાવાસો ગ્રન્થિત્રયવિભેદનઃ ॥ ૧૦૪ ॥

ભૂતમુક્તાવલીતન્તુઃ ભૂતપૂર્વો ભુજઙ્ગભૃત્ ।
અતર્ક્યસ્સુકરઃ સૂરઃ સત્તામાત્રસ્સદાશિવઃ ॥ ૧૦૫ ॥

શક્તિપાતકરશ્શક્તઃ શાશ્વતશ્શ્રેયસા નિધિઃ ।
અજીર્ણસ્સુકુમારોઽન્યઃ પારદર્શી પુરન્દરઃ ॥ ૧૦૬ ॥

અનાવરણવિજ્ઞાનો નિર્વિભાગો વિભાવસુઃ ।
વિજ્ઞાનમાત્રો વિરજાઃ વિરામો વિબુધાશ્રયઃ ॥ ૧૦૭ ॥

વિદગ્દમુગ્ધવેષાઢ્યો વિશ્વાતીતો વિશોકદઃ ।
માયાનાટ્યવિનોદજ્ઞો માયાનટનશિક્ષકઃ ॥ ૧૦૮ ॥

માયાનાટકકૃન્માયી માયાયન્ત્રવિમોચકઃ ।
વૃદ્ધિક્ષયવિનિર્મુક્તો વિદ્યોતો વિશ્વઞ્ચકઃ ॥ ૧૦૯ ॥

કાલાત્મા કાલિકાનાથઃ કાર્કોટકવિભૂષણઃ ।
ષડૂર્મિરહિતઃ સ્તવ્યઃ ષડ્ગુણૈશ્વર્યદાયકઃ ॥ ૧૧૦ ॥

ષડાધારગતઃ સાઙ્ખ્યઃ ષડક્ષરસમાશ્રયઃ ।
અનિર્દેશ્યોઽનિલોઽગમ્યોઽવિક્રિયોઽમોઘવૈભવઃ ॥ ૧૧૧ ॥

હેયાદેયવિનિર્મુક્તો હેલાકલિતતાણ્ડવઃ ।
અપર્યન્તીઽપરિચ્છેદ્યોઽગોચરો રુગ્વિમોચકઃ ॥ ૧૧૨ ॥

નિરંશો નિગમાનન્દો નિરાનન્દો નિદાનભૂઃ ।
આદિભૂતો મહાભૂતઃ સ્વેચ્છાકલિતવિગ્રહઃ ॥

નિસ્પન્દઃ પ્રત્યગાનન્દો નિર્નિમેષો નિરન્તરઃ ।
પ્રબુદ્ધઃ પરમોદારઃ પરમાનન્દસાગરઃ ॥ ૧૧૪॥

સંવત્સરઃ કલાપૂર્ણઃ સુરાસુરનમસ્કૃતઃ ।
નિર્વાણદો નિર્વૃતિસ્થો નિર્વૈરો નિરુપાધિકઃ ॥

આભાસ્વરઃ પરં તત્ત્વમાદિમઃ પેશલઃ પવિઃ ।
સંશાન્તસર્વસઙ્કલ્પઃ સંસદીશસ્સદોદિતઃ ॥ ૧૧૬॥

ભાવાભાવવિનિર્મુક્તો ભારૂપો ભાવિતો ભરઃ ।
સર્વાતીતસ્સારતરઃ સામ્બસ્સારસ્વતપ્રદઃ ॥ ૧૧૭॥

સર્વકૃત્સર્વભૃત્સર્વમયસ્સત્વાવલમ્બકઃ ।
કેવલઃ કેશવઃ કેલીકર કેવલનાયકઃ ॥ ૧૧૮॥

ઇચ્છાનિચ્છાવિરહિતો વિહારી વીર્યવર્ધનઃ ।
વિજિઘત્સો વિગતભીઃ વિપિપાસો વિભાવનઃ ॥ ૧૧૯॥

વિશ્રાન્તિભૂર્વિવસનો વિઘ્નહર્તા વિશોધકઃ ।
વીરપ્રિયો વીતભયો વિન્ધ્યદર્પવિનાશનઃ ॥ ૧૨૦॥

વેતાલનટનપ્રીતો વેતણ્ડત્વક્કૃતામ્બરઃ ।
વેલાતિલઙ્ઘિકરુણો વિલાસી વિક્રમોન્નતઃ ॥ ૧૨૧॥

વૈરાગ્યશેવધિર્વિશ્વભોક્તા સર્વોર્ધ્વસંસ્થિતઃ ।
મહાકર્તા મહાભોક્તા મહાસંવિન્મયો મધુઃ ॥ ૧૨૨॥

મનોવચોભિરગ્રાહ્યો મહાબિલકૃતાલયઃ ।
અનહઙ્કૃતિરચ્છેદ્યઃ સ્વાનન્દૈકઘનાકૃતિઃ ॥ ૧૨૩॥

સંવર્તાગ્ન્યુદરસ્સર્વાન્તરસ્થસ્સર્વદુર્ગ્રહઃ ।
સમ્પન્નસ્સઙ્ક્રમસ્સત્રી સન્ધાતા સકલોર્જિતઃ ॥ ૧૨૪॥

સમ્પન્નસ્સન્નિકૃષ્ટઃ સંવિમૃષ્ટસ્સમયદૃક્ ।
સંયમસ્થઃ સંહૃતિસ્થઃ સમ્પ્રવિષ્ટસ્સમુત્સુકઃ ॥ ૧૨૫॥

સમ્પ્રહૃષ્ટસ્સન્નિવિષ્ટઃ સંસ્પૃષ્ટસ્સમ્પ્રમર્દનઃ ।

સૂત્રભૂતસ્સ્વપ્રકાશઃ સમશીલસ્સદાદયઃ ॥ ૧૨૬॥

સત્વસંસ્થસ્સુષુપ્તિસ્થઃ સુતલ્પસ્સત્સ્વરૂપગઃ ।
સઙ્કલ્પોલ્લાસનિર્મુક્તઃ સમનીરાગચેતનઃ ॥ ૧૨૭॥

આદિત્યવર્ણસ્સઞ્જ્યોતિઃ સમ્યગ્દર્શનતત્પરઃ ।
મહાતાત્પર્યનિલયઃ પ્રત્ગ્બ્રહ્યૈક્યનિશ્ચયઃ ॥ ૧૨૮॥

પ્રપઞ્ચોલ્લાસનિર્મુક્તઃ પ્રત્યક્ષઃ પ્રતિભાત્મકઃ ।
પ્રવેગઃ પ્રમદાર્ધાઙ્ગઃ પ્રનર્તનપરાયણઃ ॥ ૧૨૯॥

યોગયોનિર્યથાભૂતો યક્ષગન્ધર્વવન્દિતઃ ।
જટિલશ્ચટુલાપાઙ્ગો મહાનટનલમ્પટઃ ॥ ૧૩૦॥

પાટલાશુઃ પટુતરઃ પારિજાતદ્રુ મૂલગઃ ।
પાપાટવીબૃહદ્ભાનુઃ ભાનુમત્કોટિકોટિભઃ ॥ ૧૩૧॥

કોટિકન્દર્પસૌભાગ્યસુન્દરો મધુરસ્મિતઃ ।
લાસ્યામૃતાબ્ધિલહરીપૂર્ણેન્દુઃ પુણ્યગોચરઃ ॥ ૧૩૨॥

રુદ્રાક્ષસ્રઙ્મયાકલ્પઃ કહ્લારકિરણદ્યુતિઃ ।
અમૂલ્યમણિસમ્ભાસ્વત્ફણીન્દ્રકરકઙ્કણઃ ॥ ૧૩૩॥

ચિચ્છક્તિલોચનાનન્દકન્દલઃ કુન્દપાણ્ડુરઃ ।
અગમ્યમહિમામ્ભોધિરનૌપમ્યયશોનિધિઃ ॥ ૧૩૪॥

ચિદાનન્દનટાધીશઃ ચિત્કેવલવપુર્ધરઃ ।
ચિદેકરસસમ્પૂર્ણઃ શ્રીશિવ શ્રીમહેશ્વરઃ ॥ ૧૩૫॥

॥ ઇતિ શ્રીનટેશસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proforead by DPD

The sahasranAmastotram is to be followed by uttarapIThikA
given separately.

*shrI naTesha sahasranAmastotram*

pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*